## 6.2.9

**मनोरञ्जनकार्यक्रमस्य सांस्कृतिककार्यक्रमस्य वा माध्यमरूपेण सरलमानकसंस्कृतस्य क्रियान्वयनाय संस्थया स्वीकृताः व्यूहाः ।**

Answer:

एतेषु प्रतिवर्षम् आयोज्यमानः युवमहोत्सवः नाट्यमहोत्सवः च प्रधानः वर्तते। एतेषु सरलमानकसंस्कृताश्रिताः एव कार्यक्रमाः अधिकाः । गभीरशास्त्रीयविषयेषु वाक्प्रतियोगितां पार्थक्येन राष्ट्रस्तरे प्रतिवर्षं समायोजयति। तत्र प्रौढविषयान् प्रौढशैल्या उपस्थापयन्ति छात्राः । अतः मनोरञ्जकसांस्कृतिककार्यक्रमाणां परिप्रक्ष्ये सरलमानकसंस्कृतस्य माध्यमरूपेण प्रयुक्ताः व्यूहाः एव अत्र क्रमशः उपस्थाप्यन्ते ।

**१. मनोरञ्जककार्यक्रमाणां माध्यमभाषा सरलमानकसंस्कृतभाषा**

विश्वविद्यालये बालानां सुखबोधाय सर्वदा विविधाः मनोरञ्जककार्यक्रमाः आयोज्यन्ते । बालाः विविधेषु उत्सवेषु मनोरञ्जककार्यक्रमान् प्रदर्शयन्ति। तत्र आयोज्यमानाः प्रमुखाः कार्यक्रमाः यथा–

- वार्षिकोत्सवः
- संस्कृतसप्ताहः
- वाग्वर्धिनी सभा
- दीक्षान्तमहोत्सवः
- काव्यकोष्ठी
- अष्टावधानम्
- नाटकमंचनम्

वार्षिकोत्सवे मनोरञ्जककार्यक्रमाणां प्रदर्शनात् पूर्वं संयोजकसमितिः कार्यक्रमाणां मूल्याङ्कनं करोति। तेषाम् औचित्यं ज्ञात्वा एव अनुमतिं ददाति। प्रेक्षकाणां बुद्धिगम्यान् एव नृत्यगीतवाद्ययन्त्ररूपकाणां प्रदर्शनाय अनुमतिं ददाति। सरलमानकसंस्कृतभाषायाः माध्यमेन छात्राः मनोरञ्जनं कारयन्ति चेत्तर्हि कालान्तरे प्रेक्षकाः संस्कृतक्षेत्रं प्रति आकृष्टाः भवन्ति इति विभावयन्ति । संस्कृतसप्ताहे अपि एषैव स्थितिः । बालेभ्यः विविधानां पद्यानां गीतानां वाचनाय अवसरः दीयते। स्पर्धाः अपि आयोज्यन्ते । मनोरञ्जनेन सह ज्ञानस्य वर्धनाय पूरकान् एव व्यूहान् विरचय्य विभागाः सफलाः भवन्ति। पुरस्कारवितरणम् अपि कुर्वन्ति इत्यतः छात्रेषु धनात्मकाभिप्रवृत्तिः परिदृश्यते। छात्राः वाग्वर्धिनीपरिषत् पक्षतः क्वचित् कार्यक्रमान् आयोजयन्ति । तत्रापि सरलभाषया एव कार्यक्रमाः भवन्ति। YouTube, Facebook, Twitter इत्यादिषु सामाजिकमाध्यमेषु अपि बालाः सरससंस्कृताश्रितान् कार्यक्रमान् निर्माय आरोपयन्ति। तत्र प्रयुक्ता भाषा सरलमानकसंस्कृतभाषा एव अवर्तत। छात्राः सरलसम्भाषणशिबिराणां चालनावसरे सरलसंस्कृ

तेन भागग्राहिणां मनोरञ्जनाय अपि विविधान् कार्यक्रमान् आयोजयन्ति। युवमहोत्सवे अपि दशाधिकाः विशिष्टाः नृत्यगीतादयो मनोरञ्जककार्यक्रमाः प्रतियोगितारूपेण आयोज्यन्ते ।

## २. सांस्कृतिककार्यक्रमाणां माध्यमभाषा सरलमानकसंस्कृतभाषा

नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् इति श्लोकवाक्यं प्रसिद्धम् अस्ति। अतः सरलशैल्या परिष्कृतभाषया एव छात्राः अभिनयन्ति । नाट्योत्सवेषु विविधपात्राणि वहन्तः रामादिवत् प्रवर्तितव्यं न रावणादिवत् इति सन्देशं यच्छन्ति। साभिनयं नाटकेषु संस्कृतेन वार्तालापं कुर्वन्ति इत्यतः आबालवृद्धा अपि सामाजिकाः संस्कृतनाटकम् आस्वादयितुं प्रभवन्ति। विभिन्नेषु अवसरेषु विश्वविद्यालयः नाट्योत्सवम् आयोज्य सरलसंस्कृतभाषामुखेन सर्वान् सामाजिकान् समाकर्षयति।